हड़ि:, पुं, काष्ठयन्त्रविशेष: । हाड़ इति भाषा । यथा,—

"निगड़ो लोहबन्धेऽस्त्री हड़ि: काष्ठस्य यन्त्रणे ॥"

इति चत्त्रियवर्गे शब्दमाला ॥

हड़िक, पुं, नीचजातिविशेष: । हाड़ि इति भाषा । तत्पर्य्याय: ।

"हड़िकस्तु मलाकर्षी हड्डकश्चावपुष्किका ॥"

इति शब्दमाला ॥

हड्ड, क्ली, अस्थि । हाड़ इति भाषा । इति शब्दचन्द्रिका ॥

हड्डक:, पुं, नीचजातिविशेष: । इति शब्दमाला ॥ हाड़ि इति भाषा ॥

हड्डजं, क्ली, मज्जा । इति शब्दचन्द्रिका ॥

हड्डि:, हड्डिक: } पुं, हड्डिपजाति: । हाड़ि इति भाषा । स तु चाण्डालीगर्भे लेटस्य वीर्येण जात: । यथा,—

"सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनक ! । बभूवतुस्तौ द्वौ पुत्त्रौ हड्डिकशौण्डिकौ तथा ॥"

हड्डिकशौण्डिकावित्यत्र दुष्टौ हड्डिडमौ तथेत्यपि ।

पाठ: । इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्याय: ॥

हड्डिप:, पुं, मलग्राहि: । इति मुग्धबोधव्याकरणम् ॥ हाड़ि इति भाषा ॥

हण्डा, व्य, नाट्योक्तौ नीचसम्बोधनम् । इत्यमरटीकायां भरत: ॥ स्त्री, मृत्पात्रभेद: । हाँड़ा इति भाषा । इति वक्ष्यमाणशब्ददर्शनात् ॥

हण्डिका, स्त्री, (हण्डा+स्वार्थे कन् । टापि अत इत्वम् ।) मृत्पात्रविशेष: । हाँड़ी इति भाषा । इति वक्ष्यमाणशब्ददर्शनात् ॥

हण्डिकासुत:, पुं, (हण्डिकाया: सुत इव ।) क्षुद्रहण्डिका । तत्पर्य्याय: । क्षणन: २ । इति त्रिकाण्डशेष: ॥ [क्वचित् ॥

हण्डी, स्त्री, हण्डिका । हाँड़ी इति भाषा । इति

हण्डे, व्य, नाट्योक्तौ नीचसम्बोधनम् । इत्यमर: । १ । ७ । १५ ॥

हत:, त्रि, (हन+क्त: ।) आशारहित: । तत्पर्य्याय: । मनोहत: २ प्रतिहत: ३ प्रतिबद्ध: ४ । इत्यमर: । ३ । १ । ४१ ॥ नष्ट: । तत्पर्य्याय: । प्रमापित: २ निबर्हित: ३ निकारित: ४ निगारित: ५ प्रवासित: ६ परासित: ७ निषूदित: ८ निहिंसित: ९ निर्व्वासित: १० संज्ञपित: ११ निर्ग्रन्थित: १२ अपासित: १३ निस्तर्हित: १४ निहत: १५ चणित: १६ परिवर्ज्जित: १७ निर्व्वापित: १८ विशसित: १९ मारित: २० प्रतिघातित: २१ उद्वासित: २२ प्रमथित: २३ क्रथित: २४ उज्जासित: २५ आलम्भित: २६ पिञ्जित: २७ विशरित: २८ घातित: २९ उन्मथित: ३० वधित: ३१ । इत्यमरदर्शनात् ॥ पूरिताङ्क: । तत्पर्य्याय: । पिण्डितम् २ गुणितम् । इति त्रिकाण्डशेष: ॥ हनने, क्ली ॥*॥ पारिभाषिकहता यथा,—

"अर्थेणवो हता विप्रो हतं श्राद्धमदक्षिणम् । अब्रह्मण्यं हतं चैत्रमनाचारं हतं कुलम् ॥ सदम्भश्च हतो धर्म्म: क्रोधेनैव हतं तप: । अदृढञ्च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ गुर्व्वभक्त्या हता नारी ब्रह्मचारी तथा हत: । अदीप्तेऽग्नौ हतो होमो हता त्वजिरमल्लिका ॥ उपजीव्या हता कन्या स्वार्थे पाकक्रिया हता । शूद्रभिक्षोर्हतो योग: कृपणस्य हतं धनम् ॥ अनभ्यासहता विद्या हतो राजा विरोधकृत् । जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतम् ॥ असत्या च हता वाणी तथा पैशुन्यवादिनी । सन्दिग्धोपहतो मन्त्रो व्यस्तचित्तो हतो जप: ॥ हतमश्रोत्रिये दानं हतो लोकश्च नास्तिक: । अश्रद्धया हतं सर्व्वं यत् कृतं पारलौकिकम् ॥ इह लोको हतो नॄणां दरिद्राणां परन्तप । मनुष्याणां तथा जन्म माघस्नानं विना हतम् ॥"

इति पाद्मोत्तरखण्डे ४ अध्याय: ॥

हतक:, पुं, (हत इव । कन् ।) नीचलोक: । इति केचित् ॥ (यथा, साहित्यदर्पणे । ६ । ३९५ ।

"देव अजातशत्रो अद्यापि दुर्य्योधनहतक: ॥")

हतमूर्ख:, पुं, (मूर्ख: हत इव ।) अतिमूर्ख: । यथा,—

"क्रूर: खलो हतमूर्ख: पापशीलो भवेन्नर: । बुधस्यागमने नित्यं जायते स नराधम: ॥"

इति जातकरत्नकोष्ठीप्रदीपे ॥

हताश:, त्रि, (हता आशा यस्य ।) निर्दय: । आशारहित: । पिशुन: । इति मेदिनी ॥ बन्ध्य: । इति शब्दरत्नावली ॥

हति:, स्त्री, (हन+क्तिन् ।) अपकर्ष: । यथा । मुख्यार्थहतिर्दोष: । हतिरपकर्ष: । इति काव्यप्रकाशे ७ उल्लास: ॥ हत्या च ॥ (यथा, महाभारते । १२ । ३६० । ८ ।

"आशया ह्यभिपन्नानामकृत्वाश्रुप्रमार्ज्जनम् । राजा वा राजपुत्त्रो वा भ्रूणहत्यैव युज्यते ॥"

ताड़नम् । यथा, गीतगोविन्दे । १ । १२ ।

"वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभम् ॥"

विनाश: । यथा, भागवते । ११ । ३ । १८ ।

"कर्म्माण्यारभमाणानां दु:खहत्यै सुखाय च । पश्येत् पाकविपर्य्यासं मिथुनीचारिणां नृणाम् ॥"

हत्नु:, पुं, (हन्ति शरीरमिति । हन+"कृहनिभ्यां क्त्नु: ।" उणा० ३ । ३९ । इति क्त्नु: । "अनुदात्तोपदेशेति ।" ६ । ४ । ३७ । इति अनुनासिकलोप: ।) व्याधि: । शस्त्रम् । इति उणादिकोष: ॥ (हननशीले, त्रि । यथा, ऋग्वेदे । १ । २५ । २ ।

"मा नो वधाय हत्नवे जिहीड़ानस्य रीरध: ॥")

हत्या, स्त्री, (हन+भावे क्यप् ।) हननम् । वध: । यथा,—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागम: । महान्ति पातकान्याहु: संसर्गश्चापि तै: सह ॥"

इति प्रायश्चित्तविवेकादि: ॥

हय:, पुं, (हन्ति सुखमिति । हन+"हनिकुषीति ।" उणा० २ । २ । इति क्थन् ।) विषण: । इति संक्षिप्तसारोणादिवृत्ति: । उणादिकोषश्च ॥

हद, ङ श्री ग्वर्थे । इति कविकल्पद्रुम: । (भ्वा०-आत्म०-अक०-अनिट् ।) ग्वर्थ: विष्ठोत्सर्ग: । ङ, हदते जन: । श्री, हत्ता । इति दुर्गादास: ॥

हदनं, क्ली, (हद+ल्युट् ।) विष्ठात्याग: । हागा इति भाषा । यथा । विट्कृज्जिर्हदनम् । इति मुग्धटीकायां दुर्गादास: ॥ हदधात्वर्थोऽप्येवम् ॥

हद्दा, स्त्री, मेषादिलग्नानां त्रिंशदंश: । तैरंशैर्होदशलग्नेषु पञ्चानां पञ्चानां ग्रहाणां सङ्ख्याविशेषेण भागविशेषो भवति । नराणां वर्षप्रवेशादौ शुभाशुभगणनायामस्य प्रयोजनम् । तद्भागविशेषो यथा ।

मेषलग्ने प्रथमं बृहस्पते: ६ भागा: । तत: शुक्रस्य ६ अंशा: । ततो बुधस्य ८ भागा: । ततो मङ्गलस्य ५ भागा: । तत: शनेरपि ५ अंशा: । समुदायेन त्रिंशदंशा: भवन्ति ॥

वृषलग्ने प्रथमं शुक्रस्य ८ भागा: । ततो बुधस्य ६ अंशा: । गुरो: ८ भागा: । शने: ५ अंशा: । मङ्गलस्य ३ अंशा: ॥

मिथुनलग्ने प्रथमं ६ भागा: बुधस्य । तत: शुक्रस्य ६ भागा: । बृहस्पते: ५ अंशा: । मङ्गलस्य ७ अंशा: । शने: ६ अंशा: ॥

कर्कटलग्ने प्रथमं मङ्गलस्य ७ अंशा: । तत: शुक्रस्य ६ भागा: । बुधस्यापि ६ भागा: । बृहस्पते: ७ अंशा: । शने: ४ अंशा: ॥

सिंहलग्ने प्रथमं ६ भागा: बृहस्पते: । शुक्रस्य ५ अंशा: । शने: ७ भागा: । बुधस्य ६ भागा: । मङ्गलस्यापि ६ भागा: ॥

कन्यालग्ने प्रथमं बुधस्य ७ अंशा: । शुक्रस्य १० अंशा: । गुरो: ४ अंशा: । मङ्गलस्य ७ भागा: । २ भागौ शनैश्चरस्य ॥

तुलालग्ने आदौ ६ अंशा: शने: । ८ भागा: बुधस्य । गुरो: ७ भागा: । शुक्रस्यापि ७ अंशा: । २ भागौ मङ्गलस्य ॥

वृश्चिकलग्ने आदौ मङ्गलस्य ७ भागा: । शुक्रस्य ४ अंशा: । ८ भागा: बुधस्य । बृहस्पते: ५ अंशा । ६ भागा: शने: ॥

धनुर्लग्ने प्रथमं बृहस्पते: १२ अंशा: । तत: शुक्रस्य ५ अंशा: । बुधस्य ४ अंशा: । मङ्गलस्य ५ भागा: । शने: ४ अंशा: ॥

मकरलग्ने आदौ बुधस्य ७ अंशा: । गुरोरपि ७ भागा: । ८ अंशा: शुक्रस्य । शने: ४ अंशा: । मङ्गलस्यापि ४ अंशा: ॥

कुम्भलग्ने प्रथमं बुधस्य ७ भागा: । शुक्रस्य ६ भागा: । बृहस्पते: ७ अंशा: । मङ्गलस्य ५ भागा: । शनेरपि ५ भागा: ॥

मीनलग्ने आदौ १२ अंशा: शुक्रस्य । ४ भागा: बृहस्पते: । बुधस्य ३ अंशा: । मङ्गलस्य ९ भागा: । तत: शने: २ भागौ ॥